# sabhApUjA

# सभापूजा

## Document Information

Text title : sabhApUjA

File name : sabhApUjA.itx

Category : misc, pUjA

Location : doc_z_misc_general

Transliterated by : Parameshwar Puttanmane poornapathi at gmail.com

Proofread by : Parameshwar Puttanmane poornapathi at gmail.com

Latest update : August 22, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# सभापूजा

ब्राह्मणेभ्यो महद्भ्यश्च वेदविद्भ्यो विशेषतः ।
पुराणशास्त्र विद्भ्यश्च सर्वेभ्यो वै नमोनमः ॥ १॥

पुत्रोत्सवे मौञ्जिबन्धे कन्यायाः प्रथमार्तवे ।
विवाहे यज्ञसमये बिन्नहं पञ्चसु स्मृतम् ॥ २॥

पूर्वं सभां नमस्कृत्य पश्चादासनपूर्वकम् ।
कृत्वोपचारं कालीनं सभां स्तोतुं समारभेत् ॥ ३॥

वराय वरवेषाय गुरूणां सुहृदामपि ।
उपचारस्तु कर्तव्यो मङ्गल्यो मङ्गलायनैः ॥ ४॥

अर्चयेदृत्विगाचार्यनृपविद्वत्सुहृद्वरान् ।
आगतान् स्वगृहं गेही यथा विभवमादरात् ॥ ५॥

गाम्भीर्यं जलधौ स्थिरत्वमचले तेजोधिकं भास्करे
    शौर्यं शान्तनवे नयस्सुरगुरौ त्यागस्तु सूर्यात्मजे ।
एकैको गुण एव तेषु निहितो युष्मासु सर्वेगुणाः
    तिष्ठन्त्येव धरामरान् हरिपरान् कस्स्तोतुमीशः क्षितौ ॥ ६॥

भवन्तस्सर्वज्ञाः सकलभुवने रूढयशसो
    वयं तावद्बालाः सरसवचने नैव निपुणाः ।
तथापीयं वाणी विशतु भवतां कर्णकुहरे
    किशोरस्यालापः खलु भवति पित्रोरतिमुदे ॥ ७॥

महत्या गदया युक्तां सत्यभामासमन्विताम् ।
सुदर्शनधरां वन्दे सभां विष्णोरिवाकृतिम् ॥ ८॥

विद्वन्नदीव्रातसहस्रपूर्णं तथा सहस्रप्रभुरत्नपूर्णम् ।
वेदान्तवाक्यार्थतरङ्गलोलं सभा समुद्रं प्रणमामि मूर्ध्ना ॥ ९॥

सभामण्डलमित्येके सभारत्नं तु केचन ।
सभासमुद्रमितरे सदसो लक्षणत्रयम् ॥ १०॥

आशीः पूर्वकमित्येके नमः पूर्वं तु केचन ।
भिन्नहं वेदपूर्वं स्यादिति सर्वैर्विनिश्चितम् ॥ ११॥

स्वस्तीति प्रतिभाषितो मुनिवरैः संस्तूयमानस्सुरैः
पार्श्वे पद्मजपद्मनाभपुरुहूताद्यैर्जयेत्यर्चितः ।
अग्रे चाप्सरसां गणैरहरहर्नृत्यद्भिराह्लादितः
सन्तुष्टो गिरिजाविवाहसमये स्यात्सम्पदेनो मृडः ॥ १२॥

सर्वाशा परिपूरणक्षमकरं सर्वोपकारोदयं
सन्मार्गाभिरतं समस्ततमसः प्रध्वंसि सत्यास्पदम् ।
ब्रह्मावासमशेषवेदनिलयं विद्याधराराधितं
प्रख्यातं भुवि भानवीयमिव वो वन्दे सभामण्डलम् ॥ १३॥

विदितचतुरभाषा भारती भालभूषा
व्यपगतबहुदोषा चन्द्रिकोद्यन्मनीषा ।
हृदयतिमिरपूषा ज्ञानविद्याविशेषा
मम भवतु सुतोषा भूसुराणां सभैषा ॥ १४॥

वेदपूर्वं तु ,
ओं नम॒ः सद॑से । नम॒ः सद॑स॒स्पत॑ये ।
नम॒ः सखी॑नां पु॒रोगा॒णां चक्षु॑षे ।
नमो॑ दि॒वे । नमः॑ पृथि॒व्यै॑ । सप्रथस॒भां मे॑ गोपाय ।
ये च॒ सभ्या॑ः सभा॒सद॑ः । तानिं॑द्रि॒याव॑तः कुरु ।
स॒र्वमा॒युरुपा॑सताम् ॥ १५॥
अहे॑बुध्नि॒य मन्त्रं॑ मे गोपाय । यमृष॑यस्त्र॒यी वि॒दा वि॒दुः ।
ऋच॒ः सामा॑नि॒ यजू॑ꣳषि । सा हि श्रीर॒मृता॑ स॒ताम् ॥ १६॥

अभ्युत्थानं चासनं स्वागतोक्तिः, पाद्यं चार्घ्यं मधुपर्काचमौ च ।
स्नानं वासो भूषणं गन्धमाल्ये धूपो दीपस्सोपहारः प्रणामः ॥ १७॥

अभ्युत्थानमथासिका वितरणं भूयो वचस्स्वागतम् ।
पाद्यं व्याजनमक्षतं क्रमवशादर्घ्यं निरर्घक्रियम् ॥

केचित्प्राहुरिमान् षडुत्तमतमानत्रोपचारान् परे ।
ब्रूयाद्वन्दनमेकमर्हणविधिं यन्मादृशा तत्क्षमम् ॥ १८॥

नास्ति सत्यात्परो धर्मस्सन्तुष्टिर्नात्मजात्परा ।
नान्नदानात्परं दानं वन्दनान्नोपचारकम् ॥ १९॥

सत्यादधिको धर्मो नास्ति । पुत्रोत्सवादपरः सन्तोषो नास्ति ।
अन्नदानादधिकदानं न विद्यते । वन्दनादधिक उपचारो नास्ति ।
तस्माद्वन्दनोपचारेणैव सर्वेऽप्युपचाराः कृतास्सन्त्विति मदीया
विज्ञापना ॥ सर्वेभ्यो नमस्काराः ॥

॥ इति सभा पूजा ॥

सङ्ग्राहकः
विद्वान् परमेश्वर भट्टः
पुट्टनमने

Encoded and proofread by Parameshwar Puttanmane poornapathi at gmail.com

*sabhApUjA*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*